# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्
## सत्रान्तपरीक्षा - अक्टूबर - 2019

| | | |
|---|---|---|
| **कक्षा - शास्त्री(SEM-1)(New)** | **प्रश्नपत्रम् – 5** | गुणाः –70 |
| विषयः – सर्वदर्शनम् | **कोड –C.C.1.1.1** | समयः- 11:30 तः 2:30पर्यन्तम् |
| दिनाङ्कः –14/10/2019 | सन्दर्भग्रन्थः – तर्कसङ्ग्रहः(दीपिका सहितः) | |

**प्रथमान्वितिः (Unit 1)** गुणाः

**प्रश्न १ अधोलिखितेषु कयोश्चिद् द्वयोः व्याख्यात्मकम् उत्तरं लिख्यताम्।** १०

१ तर्कसंग्रहस्य मङ्गलाचरणं विलिख्य तस्य व्याख्या विधीयताम्।

२ "द्रव्यगुणकर्म ......... सप्त पदार्थाः" इत्यत्र सप्तग्रहणस्य सार्थक्यं प्रदर्शयत।

३ यथाधीतग्रन्थं पञ्च कर्माणि विशदत।

**प्रश्न २ अधोलिखितेषु कस्यचिदेकस्य निबन्धात्मकम् उत्तरं प्रदीयताम्।** १०

१ मङ्गलस्य समाप्तिसाधनत्वं यथाग्रन्थं निबध्नीत।

२ तमसः दशमद्रव्यत्वं निराकुरुत।

**द्वितीयान्वितिः (Unit 2)**

**प्रश्न ३ निम्नलिखितेषु कयोश्चिद् द्वयोः व्याख्यात्मकम् उत्तरं विलिख्यताम्।** १०

१ पृथिवीलक्षणं सदलप्रयोजनं निरूप्य तस्याः भेदान् विलिखत।

२ यथाग्रन्थम् आकाशनिरूपणं कुरुत।

३ मनसः लक्षणं निरुप्य तस्य अणुत्वं साधयत।

**प्रश्न ४ अधोलिखितयोः कस्यचिदेकस्य निबन्धात्मकम् उत्तरं लिखत।** १०

१ कार्यरूपपृथिव्यादिचतुष्टस्य उत्पत्तिविनाशक्रमं यथाग्रन्थं विशदत।

२ न्यायदर्शनरीत्या आत्मस्वरूपं विविच्य ईश्वरसिद्धिविषयकम् अनुमानं विवेचयत ।

## तृतीयान्वितिः (Unit 3)

**प्रश्न ५ अधोलिखितेषु कयोश्चिद् द्वयोः व्याख्यात्मकम् उत्तरं लिखत।** १०

१ रूपलक्षणं यथाग्रन्थं विशदयत।

२ शब्दलक्षणं यथाग्रन्थं स्पष्टयत।

३ कारणलक्षणं यथाग्रन्थं प्रतिपादयत।

**प्रश्न ६ अधोलिखितयोः कस्यचिदेकस्य निबन्धात्मकम् उत्तरं लिखत।** १०

१ षड्विधसन्निकर्षात् यथाग्रन्थं निबध्नीत।

२ त्रिविधकारणं सोदाहरणं प्रतिपादयत।

**प्रश्न ७ निम्नलिखितेषु दशप्रश्नानाम् लघूत्तराणि लिखत।** १०

१ तर्कसंग्रहः किमर्थं क्रियते?

२ सामान्यं कतिविधम् ? किञ्च तत्?

३ तेजः शरीरं कुत्र प्रसिद्धम्?

४ कृष्णताराग्रवर्ति किम् इन्द्रियम्?

५ को नाम संयोगः?

६ यथार्थानुभवः कतिविधः? नामानि लिखत।

७ को नाम स्पर्शः?

८ परत्वापरत्वे किं वृत्तिनी?

९ किं नाम करणम्?

१० किं नाम प्रत्यक्षं ज्ञानम्?

११ शब्दसाक्षात्कारे कः सन्निकर्षः?

१२ प्रत्यक्षज्ञानस्य करणं किमस्ति?

१३ किं नाम निर्विकल्पकं प्रत्यक्षज्ञानम्?

१४ ‘शुक्तौ इदं रजतम्’ इति ज्ञानं कीदृशः अनुभवः?

१५ तर्कसंग्रहः केन लिखितः?